महामतिरजायत । भूमौ भूमिपतिश्रेष्ठो देवाधिप इति स्मृतः । शरभो नाम यस्तेषां दैतेयानां महासुरः । पौरवो नाम राजर्षिः स बभूव नरोत्तमः । सुक्रथस्तु महावीर्य्यः श्रीमान् राजन्महासुरः । सुपार्श्व इति विख्यातः क्षितौ जज्ञे महीपतिः । क्रथस्तु राजन् ! राजर्षिः क्षितौ जज्ञे महासुरः । पार्व्वतेय इति ख्यातः काञ्चनाचलसन्निभः । द्वितीयः शलभस्तेषामसुराणां बभूव ह । प्रह्लादो नाम बाह्लीकः स बभूव नराधिपः । चन्द्रस्तु दितिजश्रेष्ठो लोके ताराधिपोपमः । चन्द्रवर्म्मेति विख्यातः काम्बोजानां नराधिपः । अर्क इत्यभिविख्यातो यस्तु दानवपुङ्गवः । ऋषिको नाम राजर्षिर्ब्बभूव नृपसत्तमः । मृतपा इति विख्यातो य आसीदसुरोत्तमः । पश्चिमानूपकं विद्धि तं नृपं नृपसत्तम ! । गविष्ठस्तु महातेजा यः प्रख्यातो महासुरः । द्रुमसेन इति ख्यातः पृथिव्यां सोऽभवन्नृपः । मयूर इति विख्यातः श्रीमान् यस्तु महासुरः । स विश्व इति विख्यातो बभूव पृथिवीपतिः । सुपर्ण इति विख्यातस्तस्मादवरजस्तु यः । कालकीर्त्तिरिति ख्यातः पृथिव्यां सोऽभवन्नृपः । चन्द्रहन्तेति यस्तेषां कीर्त्तितः प्रवरोऽसुरः । शुनको नाम राजर्षिः स बभूव नराधिपः । विनाशनस्तु चन्द्रस्य य आख्यातो महासुरः । जानकिर्न्नाम विख्यातः सोऽभवन्मनुजाधिपः । दीर्घजिह्वस्तु कौरव्य य उक्तो दानवर्षभः । काशिराजः स विख्यातः पृथिव्यां पृथिवीपते ! । ग्रहन्तु सुषुवे यन्तु सिंहिकाऽर्केन्दुमर्द्दनम् । स क्राथ इति विख्यातो बभूव मनुजाधिपः । अनायुषस्तु पुत्त्राणां चतुर्णां प्रवरोऽसुरः । विक्षरो नाम तेजस्वी वसुमित्रो नृपः स्मृतः । द्वितीयो विक्षराद्यस्तु नराधिप ! महासुरः । पाण्ड्यराष्ट्राधिप इति विख्यातः सोऽभवन्नृपः । बलीन इति विख्यातो यस्त्वासीदसुरोत्तमः । पौण्ड्रमात्स्यक इत्येवं बभूव स नराधिपः । वृत्र इत्यभिविख्यातो यस्तु राजन्महासुरः । मणिमान्नाम राजर्षिः स बभूव नराधिपः । क्रोधहन्तेति यस्तस्य बभूवावरजोऽसुरः । दण्ड इत्यभिविख्यातः स आसीन्नृपतिः क्षितौ । क्रोधवर्द्धन इत्येव यस्त्वन्यः परिकीर्त्तितः । दण्डधार इति ख्यातः सोऽभवन्मनुजर्षभः । कालेयानान्तु ये पुत्त्रास्तेषामष्टौ नराधिपाः । जज्ञिरे राजशार्द्दूल ! शार्द्दूलसमविक्रमाः । मगधेषु जयत्सेनस्तेषामासीत्स पार्थिवः । अष्टानाम्प्रवरस्तेषां कालेयानां महासुरः । द्वितीयस्तु ततस्तेषां श्रीमान्हरिहयोपमः । अपराजित इत्येवं स बभूव नराधिपः । तृतीयस्तु महातेजा महामायो महासुरः । निषादाधिपतिर्जज्ञे भुवि भीमपराक्रमः । तेषामन्यतमो यस्तु चतुर्थः परिकीर्त्तितः । श्रेणिमानिति विख्यातः क्षितौ राजर्षिसत्तमः । पञ्चमस्त्वभवत्तेषां प्रवरो यो महासुरः । महौजा इति विख्यातो बभूवेह परन्तपः । षष्ठस्तु मतिमान् यो वै तेषामासीन्महासुरः । अभीरुरिति विख्यातः क्षितौ राजर्षिसत्तमः । समुद्रसेनस्तु नृपस्तेषामेवाभवद्गणात् । विश्रुतः सागरान्तायां क्षितौ धर्म्मार्थतत्त्ववित् । बृहन्नामाष्टमस्तेषां कालेयानां नराधिप ! । बभूव राजा धर्म्मात्मा सर्व्वभूतहिते रतः । कुक्षिस्तु राजन्! विख्यातो दानवानां महाबलः । पार्व्वतीय इति ख्यातः काञ्चनाचलसन्निभः । क्रथनश्च महावीर्य्यः श्रीमान्राजन्महासुरः । सूर्य्याक्ष इति विख्यातः क्षितौ जज्ञे महीपतिः । असुराणान्तु यः सूर्य्यः श्रीमांश्चैव महासुरः । दरदो नाम बाह्लीको वरः सर्व्वमहीक्षिताम् । गणः क्रोधवशो नाम यस्ते राजन्! प्रकीर्त्तितः । ततः सञ्जज्ञिरे वीराः क्षिताविह नराधिपाः । मद्रकः कर्णवेष्टश्च सिद्धार्थः कीटकस्तथा । सुवीरश्च सुबाहुश्च महावीरोऽथ वाह्लिकः । क्रथो विचित्रः सुरथः श्रीमान्नीलश्च भूमिपः । चीरवासाश्च कौरव्य ! भूमिपालश्च नामतः । दन्तवक्रश्च नामासीद्दुर्ज्जयश्चैव दानवः । रुक्मी च नृपशार्द्दूलो राजा च जनमेजयः । आषाढ़ो वायुवेगश्च भूरितेजास्तथैव च । एकलव्यः सुमित्रश्च वाटधानोऽथ गोमुखः । कारूषकाश्च राजानः क्षेमधूर्त्तिस्तथैव च । श्रुतायुरुद्वहश्चैव बृहत्सेनस्तथैव च । क्षेमोऽग्रतीर्थः कुहरः कलिङ्गेषु नराधिपः । मतिमांश्च मनुष्येन्द्र ईश्वरश्चेति विश्रुतः । गणात् क्रोधवशादेष राजपूगोऽभवत् क्षितौ । जातः पुरा महाभागो महाकीर्त्तिर्महाबलः । कालनेमिरिति ख्यातो दानवानां महाबलः । स कंस इति विख्यात उग्रसेनसुतो बली । यस्त्वासीद्देवको नाम देवराजसमद्युतिः । स गन्धर्व्वपतिर्मुख्यः क्षितौ जज्ञे नराधिपः । बृहस्पतेर्बृहत्कीर्त्तेर्द्देवर्षेर्व्विद्धि भारत ! । अंशात्द्रोणं समुत्पन्नं भारद्वाजमयोनिजम् । धन्विनां नृपशार्द्दूल ! यः सर्व्वास्त्रविदुत्तमः । महाकीर्त्तिर्महातेजाः स जज्ञे मनुजेश्वर ! । धनुर्व्वेदे च वेदे च यं तं वेदविदो विदुः । वरिष्ठं चित्रकर्म्माणं द्रोणं स्वकुलवर्द्धनम् । महादेवान्तकाभ्याञ्च कामात् क्रोधाच्च भारत ! । एकत्वमुपपन्नानां जज्ञे शूरः परन्तपः । अश्वत्थामा महावीर्य्यः शत्रुपक्षक्षयावहः । वीरः कमलपत्राक्षः क्षितावा-